हरिमन्दिरवत् सर्व्वं तद्राधावल्लभीयकम् ।
श्रीराधावल्लभीयं यत्तिलकं सुमनोहरम् ॥
यौगलं तत्तु विज्ञेयं यदि मध्यसुरङ्गितम् ॥ * ॥
यदूर्द्ध्वपुण्ड्रं तिलकं शोभनं तन्मनोहरम् ।
तन्मध्यपीतरेखञ्च श्रीमद्रामानुजं विदुः ॥ * ॥
श्रीरामोपासना यस्य तिलकं तूर्द्ध्वपुण्ड्रकम् ।
भ्रुवोर्म्मध्ये सबिन्दु स्याद्यदि विप्र ! मनोहरम् ॥
हरेः सर्व्वावताराणां मत्स्यादीनां विशेषतः ।
उपासकानां तिलकं केवलं हरिमन्दिरम् ॥*॥
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्त्रियाणां तथैव च ।
वैश्यानान्तु तथा विप्र ! शूद्रादेर्म्मण्डलाकृतम् ॥
अच्छिद्रमूर्द्ध्वपुण्ड्रन्तु ये कुर्व्वन्ति जनाधमाः ।
तेषां ललाटे सततं शुनः पादो न संशयः ॥
दृष्ट्वा भाले द्विजातीनामच्छिद्रमूर्द्ध्वपुण्ड्रकम् ।
कार्य्यः कृष्णस्मृतिं कृत्वा वस्त्रेणाच्छादयेन्मुखम् ॥
ललाटदक्षिणे ब्रह्मा वसेद्वामे महेश्वरः ।
मध्ये विष्णुर्व्वसेन्नित्यं तस्मान्मध्यं न लेपयेत् ॥*॥
वर्त्तुलं तिर्य्यगच्छिद्रं ह्रस्वं दीर्घं ततं न तु ।
वक्रलग्नाग्रसंयुक्तं तिलकं यन्निरर्थकम् ॥
खनित्रयष्टिकुन्तत्रिशूलमुकुटाकृतम् ।
त्रिपुण्ड्रमर्द्धचन्द्रञ्च तिलकं यन्निरर्थकम् ॥
प्रमाणन्तूर्द्ध्वपुण्ड्रस्य दीर्घं स्यात् कलिवर्द्धनम् ।
आनासामूलमारभ्य ब्रह्मरन्ध्रगतं यदि ॥
शूद्रस्यैकाङ्गुलं प्रोक्तमायतं द्व्यङ्गुलं विशि ।
क्षत्त्रिये त्र्यङ्गुलं तद्वद्ब्राह्मणे चतुरङ्गुलम् ॥
नासिकायास्त्रिभागैको भागो मानेन यो भवेत् ।
भ्रुवोर्म्मध्यादधःस्थानं मूलमाहुर्म्मनीषिणः ॥*॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
कुर्य्याद्यदूर्द्ध्वपुण्ड्रं तद्वैष्णवा हरिमन्दिरम् ॥
वैष्णवा विप्र ! भूपाश्च वैश्यशूद्रान्त्यजाश्रमाः ।
यदूर्द्ध्वपुण्ड्रं बिभ्रयुस्तदेव हरिमन्दिरम् ॥
नरो वाप्यथवा नारी यदि कृष्णपथं लभेत् ।
यत्नतस्तुलसीमाला सन्धार्य्या हरिमन्दिरम् ॥
मध्यच्छिद्रं न कुर्य्याद्यस्तिलकं यदि वैष्णवः ।
श्वपदं तच्चितातुल्यं भवेन्नारद ! नान्यथा ॥ * ॥
दण्डाकारद्विरेखं यत्तिलकं मूलकोणकम् ।
मध्यच्छिद्रन्तु तत् प्राहुरूर्द्ध्वपुण्ड्रं मनोहरम् ॥
अधोमुखाब्जकलिकाकारं तिलकमुत्तमम् ।
मध्यच्छिद्रं युग्मरेखमूर्द्ध्वपुण्ड्रं प्रकीर्त्तितम् ॥*॥
तीर्थमृद्यज्ञकाष्ठञ्च विल्वो मलयसम्भवम् ।
अश्वत्थतुलसीमूलमृत्तिका गोष्पदस्य च ॥
जाह्नवीमृत्कह्लानिम्बतुलसीकाष्ठमेव च ।
कस्तूरी कुङ्कुमं फल्गु सिन्दूरं रक्तचन्दनम् ॥
गोरोचना गन्धकाष्ठं जलं चागुरु गोमयम् ।
धात्रीमूलस्य मृद्धन्यो हरिद्रा गोरहस्य च ॥
स्नानान्ते सर्व्ववर्णानामाश्रमाणान्तथैव च ।
एतानि तिलकान्याहुः सन्ध्यादिसर्व्वकर्म्मसु ।"*॥
अपि च ।
"गङ्गामृत्तुलसीमूलमृत्तिका मलयोद्भवम् ।
साधोश्चरणसंलग्नं रजो मृद्गोष्पदस्य च ॥
याम्बलमूलमृद्गोपीचन्दनं तीर्थमृत्तिका ।
कुङ्कुमं तुलसीकाष्ठं वैष्णवाङ्गतमृत्तिका ॥
गोरोचना च कस्तूरी हरिद्रागुरुचन्दनम् ।
वल्मीकमृत्तिका गन्धः पद्मकं हरिचन्दनम् ॥
गन्धकाष्ठं महानिम्बो यमुनातीरमृत्तिका ।
गुरुपादरजोवारिणी साध्वङ्घ्रिरजोजले ॥
कृत्वा प्रतिदिनं स्नानमेतैर्गन्धमृदादिभिः ।
चारु यत्तिलकं शास्त्रं तन्नाम्ना वैष्णवैर्धृतम् ॥*॥
काम्यं नैमित्तिकं नित्यं यत्किञ्चित् कर्म्म नारद ! ।
वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना ॥
कर्म्म वर्णाश्रमाणां स्यात दैवं पैत्रं न तत्फलम् ।
स्नानं सन्ध्यां पञ्चयज्ञान् पैत्रं होमादि कर्म्म यः ।
विना तिलकदर्भाभ्यां कुर्य्यात्तन्निष्फलं भवेत् ॥"
इति पाद्मोत्तरखण्डम् ॥ * ॥
"दीक्षादर्शे जले वापि यो विदध्यात् प्रयत्नतः ।
ऊर्द्ध्वपुण्ड्रं महाभागः स याति परमाङ्गतिम् ॥"
इति पाद्मे पातालखण्डम् ॥ * ॥
"शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् ।
विष्णागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत् ॥"
इति नागोजीभट्टधृतसनत्संहिता ॥

तिलकटः, पुं, तिलस्य रजः । (तिल+"अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् ।" ५ । २ । २९ । इत्यस्य वार्त्तिकोक्त्या कटच् ।) तिलचूर्णम् । इति शब्दार्थकल्पतरुः व्याकरणञ्च ॥

तिलका, स्त्री, (तिलस्तिलवीजकोष इव कायतीति । कै+कः ।) हारभेदः । इति जटाधरः ॥ (षडक्षरपादके छन्दोभेदे । शब्दार्थचिन्तामणिधृततल्लक्षणादिकं यथा,—
"सगणद्वितयं भवतीह यदा ।
रसवर्णपदा तिलकेति तदा ॥"
उदाहरणम् ।
"वनमालिकथा सकलालि ! त्वया ।
पुनरेति कथं मम दृष्टिपथम् ॥")

तिलकालकः, पुं, (तिल इव कालकः कृष्णवर्णः ।) शरीरस्थतिलः । इत्यमरः । २ । ६ । ४९ ॥ तल्लक्षणानि यथा,—
"कृष्णानि तिलमात्राणि नीरुजानि समानि च ।
वातपित्तकफोद्रेकात्तान् विद्यात्तिलकालकान् ॥"
समानि अनुन्नतानि । अयं तिल इति लोके प्रसिद्धः । तच्चिकित्सा यथा,—
"चर्म्मकीलं जतुमणिं मशकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥
तिलयुक्तः । इत्यमरटीका ॥

तिलकाश्रयः, पुं, (तिलकस्य आश्रयः ।) ललाटम् । इति शब्दार्थकल्पतरुः ॥

तिलकिट्टं, क्ली, (तिलस्य किट्टं मलम् ।) तिलमलम् । (खइल इति भाषा ॥) तत्पर्य्यायः । पिण्याकः २ तिलखलिः ३ । अस्य गुणाः । ग्लपनत्वम् । रूक्षत्वम् । विष्टम्भित्वम् । दृष्टिदूषकत्वञ्च । इति भावप्रकाशः ॥

तिलकी, [न्] त्रि, (तिलकमस्यास्तीति । तिलक+इनिः ।) तिलकयुक्तः । यथा । शिखी तिलकी कर्म्म कुर्य्यात् । इति स्मृतिः ॥

तिलचित्रपत्त्रकः, पुं, (तिलचित्राणि तिलवच्चिह्नयुक्तानि पत्त्राणि यस्य । कप् ।) तैलकन्दः । इति राजनिर्घण्टः ॥

तिलचूर्णं, क्ली, (तिलस्य चूर्णम् ।) चूर्णीकृततिलः । तत्पर्य्यायः । तिलकल्कजम् २ पललम् ३ पिष्टकम् ४ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । पित्तास्रबलपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, पञ्चतन्त्रे । २ । ८३ ।
"ततस्तिलान् लुञ्चयित्वा तिलचूर्णेन ब्राह्मणं भोजयिष्यामि ॥")

तिलतण्डुलकं, क्ली, (तिलस्य तण्डुल इव संश्लेषेण कायतीति । कै+कः । तिलतण्डुलवत् दृढ़संश्लेषत्वादस्य तथात्वम् ।) आलिङ्गनम् । इति शब्दमाला ॥ तिलमिश्रिततण्डुलम् ॥ (तिलस्य शस्यञ्च ॥)

तिलतैलं, क्ली, (तिलस्य स्नेहः । तिल+"स्नेहे तैलच् ।" ५ । २ । २९ । इत्यस्य वार्त्तिकोक्त्या तैलच् ।) तिलस्नेहः । तिलेषु तैलम् । इति व्याकरणम् ॥ (यथा, सुश्रुते । १ । ४५ ।
सर्व्वेभ्यस्त्विह तैलेभ्यस्तिलतैलं प्रशस्यते ॥")
अस्य गुणाः तिलशब्दे द्रष्टव्याः ॥ (अपरे गुणाश्च । यथा, हारीते १ स्थाने नवमेऽध्याये ।
"तच्च ज्ञेयं समासेन यथायोगं यथाविधि ।
कषायानुरसं स्वादु सूक्ष्ममुष्णं व्यवायि च ॥
पित्तकृद्वातशमनं श्लेष्मरोगादिवर्द्धनम् ।
अल्पं रुचिकरं मेध्यं कण्डूकुष्ठविकारनुत् ॥
हृद्यं श्रमापहं ज्ञेयं तिलतैलं विदुर्बुधाः ।
छिन्ने भिन्ने च्युते दष्टे क्षते भग्नेऽग्निदाहके ॥
वाताभिष्यन्दिस्फुटने चाभ्यङ्गे तिलतैलकम् ।
विषे बालशोनसर्पे सेकाभ्यङ्गावगाहने ॥
पाने वस्तौ च नस्ये च तथा कर्णप्रपूरणे ।
तिलतैलं विधेयं स्यात् सर्व्वरोगनिवारणम् ॥"
"तथा छिन्नभिन्नविद्धोत्पिष्टच्युतमथितक्षतपिच्छितभग्नस्फुटितक्षाराग्निदग्धविश्लिष्टदारिताभिहतदुर्भग्नमृगव्यालविदष्टप्रभृतिषु च परिषेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ।
तद्वस्तिषु च पाने च नस्ये कर्णाक्षिपूरणे ।
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

तिलधेनुः, स्त्री, (तिलैर्विहिता धेनुः । शाकपार्थिवादिवत् समासः ।) तिलनिर्म्मिता धेनुः । यथा,—
"विधानं तिलधेनोस्त्वं ब्रूहि शीघ्रं द्विजोत्तम ! ।
मुनिः प्राह विधानं यत् तच्छृणुष्व नराधिप ! ॥
षोड़शाढ़मयी धेनुश्चतुर्भिर्व्वत्सको भवेत् ।
इक्षुदण्डमयाः पादा दन्ताः पुष्पमयाः शुभाः ॥
नासा गन्धमयी यस्या जिह्वा गुड़मयी तथा ।
स्थितां कृष्णाजिने धेनुं वासोभिर्व्वासितां शुभाम् ॥
सूत्रेण वाषितां कृत्वा पञ्चरत्नसमन्विताम् ।
सर्व्वौषधिसमायुक्तां मन्त्रपूतान्तु दापयेत् ॥
अन्नं मे जायतां सद्यः पानं सर्व्वरसास्तथा ।
कामं सम्पादयास्माकं तिलधेनुमुपार्ज्जिताम् ॥